कृष्ण यजुर्वेदीय तैत्तिरीय सं हिता

॥ अथ चतुर्थ काण्डे षष्ठः प्रश्नः॥

हरिः ओम्॥ अश्मन्नूर्जं पर्वते शिश्रियाणां वाते पर्जन्ये वरुणस्य शुष्मे। अद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि सं भृतां तां न इषमूर्जं धत्त मरुतः सग्ं राणाः॥ अश्मग्ग् स्ते क्षुदमुं ते शुगृच्छतु यं द्विष्मः॥ समुद्रस्य त्वाऽवाकयाऽग्ने परि व्ययामसि। पावको अस्मभ्यग्ं शिवो भव॥ हिमस्य त्वा जरायुणाऽग्ने परि व्ययामसि। पावको अस्मभ्यग्ं शिवो भव॥ उप [१] ज्मन्नुप वेतसेऽवत्तरं नदीष्वा। अग्ने पित्तमपामसि॥ मण्डूकि ताभिरा गहि सेमं नो यज्ञम्। पावकवर्णग्ं शिवं कृधि॥ पावक आ चितयन्त्या कृपा। क्षामन्नुरुच उषसो न भानुना॥ तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे। न ततृषाणो अजरः॥ अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवान् [२] वक्षि यक्षि च॥ स नः पावक दीदिवोऽग्ने देवाग्ं इहाऽऽ वह। उप यज्ञग्ं हविश्च नः॥ अपामिदं न्ययनग्ं समुद्रस्य निवेशनम्। अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यग्ं शिवो भव॥ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे। अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यग्ं शिवो भव॥ नृषदे वड- [३] प्सुषदे वड्वनसदे वड्बर्हिषदे वट्सुवर्विदे वट्॥ ये देवा देवानां यज्ञिया यज्ञियानाग्ं संवथ्सरीणमुप भागमासते। अहुतादो हविषो यज्ञे अस्मिन्थ्स्वयं जुहुध्वं मधुनो घृतस्य॥ ये देवा देवेष्वधि देवत्वमायन् ये ब्रह्मणः पुरएतारो अस्य। येभ्यो नर्ते पवते धाम किं चन न ते दिवो न पृथिव्या अधि स्नुषु॥ प्राणदा [४]

अपानदा व्यानदाश्चक्षुर्दा वर्चोदा वरिवोदाः। अन्यं ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यग्ं शिवो भव॥ अग्निस्तिग्मेन शोचिषा यग्ं सद्विश्वं न्यत्रिणम्। अग्निर्नो वग्ं सते रयिम्॥ सैनाऽनीकेन सुविदत्रो अस्मे यष्टा देवाग्ं आयजिष्ठः स्वस्ति। अदब्धोगोपा उत नः परस्पा अग्ने द्युमदुत रेवद्दिदीहि॥[५]

*उप देवान् वट्प्राणदाश्चतुश्चत्वारिग्ंशच्च॥**4.6.1***॥

य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः। स आशिषा द्रविणमिच्छमानः परमच्छदो वर आ विवेश॥ विश्वकर्मा मनसा यद्विहाया धाता विधाता परमोत सन्दृक्। तेषामिष्टानि समिषा मदन्ति यत्र सप्तऋषीन्पर एकमाहुः॥ यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सज्जजान।[६] यो देवानां नामधा एक एव तग्ं सं प्रश्नं भुवना यन्त्यन्या॥ त आऽयजन्त द्रविणग्ं समस्मा ऋषयः पूर्वे जरितारो न भूना। असूर्ता सूर्ता रजसो विमाने ये भूतानि समकृण्वन्निमानि॥ न तं विदाथ य इदं जजानाऽन्यद्युष्माकमन्तरं भवाति। नीहारेण प्रावृता जल्प्या चाऽसुतृप उक्थशासश्चरन्ति॥ परो दिवा पर एना [७] पृथिव्या परो देवेभिरसुरैर्गुहा यत्। कग्ग् स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे॥ तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे। अजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधि श्रितम्॥ विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद्द्वितीयः। तृतीयः पिता जनितौषधीना- [८] मपां गर्भं व्यदधात्पुरुत्रा॥ चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नन्नमाने। यदेदन्ता अददृग्ं हन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम्॥ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्। सं बाहुभ्यां

नमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः॥ किग्ग् स्विदासीदधिष्ठानमारं भणं कतमथ्स्वित्किमासीत्। यदी भूमिं जनय– [९] न्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः॥ किग्ग् स्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन्न्॥ या ते धामानि परमाणि याऽवमा या मध्यमा विश्वकर्मन्नुतेमा। शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तनुवं जुषाणः॥ वाचस्पतिं विश्वकर्माणमूतये [१०] मनोयुजं वाजे अद्या हुवेम। स नो नेदिष्ठा हवनानि जोषते विश्वशं भूरवसे साधुकर्मा॥ विश्वकर्मन् हविषा वावृधानः स्वयं यजस्व तनुवं जुषाणः। मुह्यन्त्वन्ये अभितः सपत्ना इहाऽस्माकं मघवा सूरिरस्तु॥ विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम्। तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथाऽसत्॥ समुद्राय वयुनाय सिन्धूनां पतये नमः। नदीनाग्ं सर्वासां पित्रे जुहुता विश्वकर्मणे विश्वाऽहाऽमर्त्यग्ं हविः॥[११]

जजानैनौषधीनां भूमिं जनयन्नूतये नमो नव च||4.6.2||

उदेनमुत्तरान्नयाऽग्ने घृतेनाऽऽहुत। रायस्पोषेण सग्ं सृज प्रजया च धनेन च॥ इन्द्रेमं प्रतरां कृधि सजातानामसद्वशी। समेनं वर्चसा सृज देवेभ्यो भागधा असत्॥ यस्य कुर्मो हविर्गृहे तमग्ने वर्धया त्वम्। तस्मै देवा अधि ब्रवन्नयं च ब्रह्मणस्पतिः॥ उदु त्वा विश्वे देवा [१२] अग्ने भरन्तु चित्तिभिः। स नो भव शिवतमः सुप्रतीको विभावसुः॥ पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपाऽमतिं दुर्मतिं बाधमानाः। रायस्पोषे यज्ञपतिमाभजन्तीः॥ रायस्पोषे अधि यज्ञो अस्थाथ्समिद्धे अग्नावधि मामहानः। उक्थपत्र ईड्यो गृभीतस्तप्तं घर्मं परिगृह्याऽयजन्त॥ ऊर्जा यद्यज्ञमशमन्त देवा दैव्याय

धर्त्रे जोष्ट्रे। देवश्रीः श्रीमणाः शतपयाः [१३] परिगृह्य देवा यज्ञमायन्न्॥ सूर्यरश्मिर्हरिकेशः पुरस्ताथ्सविता ज्योतिरुदयाग्ं अजस्रम्। तस्य पूषा प्रसवं याति देवः सं पश्यन्विश्वा भुवनानि गोपाः॥ देवा देवेभ्यो अध्वर्यन्तो अस्थुर्वीतग्ं शमित्रे शमिता यजध्यै। तुरीयो यज्ञो यत्र हव्यमेति ततः पावका आशिषो नो जुषन्ताम्॥ विमान एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरिक्षम्। स विश्वाचीरभि [१४] चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम्॥ उक्षा समुद्रो अरुणः सुपर्णः पूर्वस्य योनिं पितुराविवेश। मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसः पात्यन्तौ॥ इन्द्रं विश्वा अवीवृधन्थ्समुद्रव्यचसं गिरः। रथीतमग्ं रथीनां वाजानाग्ं सत्पतिं पतिम्॥ सुम्नहूर्यज्ञो देवाग्ं आ च वक्षद्यक्षदग्निर्देवो देवाग्ं आ च वक्षत्। वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीत्। अथा सपत्नाग्ं इन्द्रो मे निग्राभेणाऽधराग्ं अकः॥ उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्न्। अथा सपत्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम्॥[१५]

विश्वेदेवाः शतपया अभि वाजस्य शाड्विग्ंशतिश्च॥4.6.3॥

आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम्। संक्रन्दनोऽनिमिष एकवीरः शतग्ं सेना अजयथ्साकमिन्द्रः॥ संक्रन्दनेनाऽनिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयत तथ्सहध्वं युधो नर इषुहस्तेन वृष्णा॥ स इषुहस्तैः स निषङ्गिभिर्वशी सग्ग् स्रष्टा स युध इन्द्रो गणेन। सग्ं सृष्टजिथ्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता॥ बृहस्पते परि दीया [१६] रथेन रक्षोहाऽमित्राग्ं अपबाधमानः। प्रभञ्जन्थ्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा। इमग्ं सजाता अनु वीरयध्वमिन्द्रग्ं सखायोऽनु सग्ं रभध्वम्॥ बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः। अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित्॥ अभि गोत्राणि सहसा गाहमानोऽदायो [१७] वीरः शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयुध्योऽस्माकग्ं सेना अवतु प्र युथ्सु॥ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताग्ं शर्ध उग्रम्। महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्॥ अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु। [१८] अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु॥ उद्धर्षय मघवन्नायुधान्युथ्सत्वनां मामकानां महाग्ं सि। उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः॥ उप प्रेत जयता नरः स्थिरा वः सन्तु बाहवः। इन्द्रो वः शर्म यच्छत्वनाधृष्या यथाऽसथ॥ अवसृष्टा परा पत शरव्ये ब्रह्मसग्ं शिता। गच्छाऽमित्रान्प्र [१९] विश मैषां कं चनोच्छिषः॥ मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाऽभि वस्ताम्। उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनु मदन्तु देवाः॥ यत्र बाणाः सं पतन्ति कुमारा विशिखा इव। इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु॥[२०]

दीयाऽदायो जयन्त्वमित्रान्प्र चत्वारिग्ंशच्च॥4.6.4॥

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरोअग्निर्भवेह। विश्वा आशा दीद्यानो वि भाह्यूर्जं नो धेहि द्विपदे चतुष्पदे॥ क्रमध्वमग्निना नाकमुख्यग्ं हस्तेषु बिभ्रतः। दिवः

पृष्ठग्ं सुवर्गत्वा मिश्रा देवेभिराध्वम्॥ पृथिव्या अहमुदन्तरिक्षमाऽरुहमन्तरिक्षाद्दिवमाऽरुहम्। दिवो नाकस्य पृष्ठाथ्सुवर्ज्योतिरगा [२१] महम्॥ सुवर्यन्तो नाऽपेक्षन्त आ द्याग्ं रोहन्ति रोदसी। यज्ञं ये विश्वतोधारग्ं सुविद्वाग्ं सो वितेनिरे॥ अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम्। इयक्षमाणा भृगुभिः सजोषाः सुवर्यन्तु यजमानाः स्वस्ति॥ नक्तोषासा समनसा विरूपे धापयेते शिशुमेकग्ं समीची। द्यावा क्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः॥ अग्ने सहस्राक्ष [२२] शतमूर्धङ्छतं ते प्राणाः सहस्रमपानाः। त्वग्ं साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा॥ सुपर्णोऽसि गरुत्मान्पृथिव्याग्ं सीद पृष्ठे पृथिव्याः सीद भासाऽन्तरिक्षमा पृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्वग्ं ह॥ आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वां योनिमा सीद साध्या। अस्मिन्थ्सधस्थे अध्युत्तरस्मिन्विश्वे देवा [२३] यजमानश्च सीदत॥ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ। त्वाग्ं शश्वन्त उप यन्ति वाजाः॥ विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे। यस्माद्योनेरुदारिथा यजे तं प्र त्वे हवीग्ं षि जुहुरे समिद्धे॥ ताग्ं सवितुर्वरेण्यस्य चित्रामाऽहं वृणे सुमतिं विश्वजन्याम्। यामस्य कण्वो अदुहत्प्रपीनाग्ं सहस्रधारां [२४] पयसा महीं गाम्॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्तर्षयः सप्त धाम प्रियाणि। सप्तहोत्राः सप्त धा त्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन॥ ईदृङ्चाऽन्यादृङ्चैतादृङ्च प्रतिदृङ्च मितश्च सं मितश्च सभराः। शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माग्श्च सत्यश्चर्तपाश्चाऽत्यग्ं हाः॥ [२५] ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चाऽन्त्यमित्रश्च दूरे अमित्रश्च गणः। ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता च

विधर्ता च विधारयः। ईदृक्षास एतादृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास एतन। मितासश्च सं मितासश्च न ऊतये सभरसो मरुतो यज्ञे अस्मिन्निन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मानो यथेन्द्रं दैवीर्विशो मरुतोऽनुवर्त्मान एवमिमं यजमानं दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु॥[२६]

अगाग्ं सजस्राक्ष देवाः सहस्रधारामत्यग्ंहा अनुवर्त्मनः षोडश च॥4.6.5॥

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे। अनाविद्धया तनुवा जय त्वग्ं स त्वा वर्मणो महिमा पिपर्तु॥ धन्वना गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम। धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम॥ वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियग्ं सखायं परिषस्वजाना। योषेव शिङ्क्ते वितताऽधि धन्व- [२७] ञ्ज्या इयग्ं समने पारयन्ती॥ ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे। अप शत्रून् विध्यताग्ं सं विदाने आर्ली इमे विष्फुरन्ती अमित्रान्॥ बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनाऽवगत्य। इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः॥ रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः। अभीशूनां महिमानं [२८] पनायत मनः पश्चादनु यच्छन्ति रश्मयः॥ तीव्रान् घोषान् कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः। अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूग्ं रनपव्ययन्तः॥ रथवाहनग्ं हविरस्य नाम यत्राऽऽयुधं निहितमस्य वर्म। तत्रा रथमुप शग्मग्ं सदेम विश्वाहा वयग्ं सुमनस्यमानाः॥ स्वादुषग्ं सदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः। चित्रसेना इषुबला अमृधाः सतोवीरा उरवो व्रातसाहाः॥ ब्राह्मणासः [२९] पितरः सोम्यासः शिवे नो

द्यावापृथिवी अनेहसा॥ पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशग्ं स ईशत॥ सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता। यत्रा नरः सं च वि च द्रवन्ति तत्राऽस्मभ्यमिषवः शर्म यग्ंसन्न्॥ ऋजीते परि वृङ्ग्धि नोऽश्मा भवतु नस्तनूः। सोमो अधि ब्रवीतु नोऽदिति- [३०] शर्म यच्छतु॥ आ जङ्घन्ति सान्वेषां जघनाग्ं उप जिघ्नते। अश्वाजनि प्रचेतसोऽश्वान्थ्समथ्सु चोदय॥ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमाग्ं सं परि पातु विश्वतः॥ वनस्पते वीड्वङ्गो हि भूया अस्मथ्सखा प्रतरणः सुवीरः। गोभिः सन्नद्धो असि वीडयस्वाऽऽस्थाता ते जयतु जेत्वानि॥ दिवः पृथिव्याः पर्यो- [३१] ज उद्भृतं वनस्पतिभ्यः पर्याभृतग्ं सहः। अपामोज्मानं परि गोभिरावृतमिन्द्रस्य वज्रग्ं हविषा रथं यज॥ इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः। सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय॥ उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत्। स दुन्दुभे सजूरिन्द्रेण देवैर्दूरा- [३२] द्दवीयो अप सेध शत्रून्॥ आ क्रन्दय बलमोजो न आ धा निष्टनिहि दुरिता बाधमानः। अप प्रोथ दुन्दुभे दुच्छुनाग्ं इत इन्द्रस्य मुष्टिरसि वीडयस्व॥ आऽमूरज प्रत्यावर्तयेऽमाः केतुमद्दुन्दुभिर्वावदीति। समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु॥[३३]

धन्वन्महिमानं ब्राह्मणासोऽदितिः पृथिव्याः परि दूरादेक चत्वारिग्ंशच्च॥4.6.6॥

यदक्रन्दः प्रथमं जायमान उद्यन्थ्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन्न्॥ यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो

अध्यतिष्ठत्। गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट॥ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन। असि सोमेन समया विपृक्त [३४] आहुस्ते त्रीणि दिवि बन्धनानि॥ त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे। उतेव मे वरुणश्छन्त्स्यर्वन् यत्रा त आहुः परमं जनित्रम्॥ इमा ते वाजिन्नवमार्जनानीमा शफानाग्ं सनितुर्निधाना। अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः॥ आत्मानं ते मनसाऽऽरादजानामवो दिवा [३५] पतयन्तं पतङ्गम्। शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि॥ अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः। यदा ते मर्तो अनु भोगमानडादिद्ग्रसिष्ठ ओषधीरजीगः॥ अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम्। अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं [३६] ते॥ हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत्। देवा इदस्य हविरद्यमायन् यो अर्वन्तं प्रथमो अध्यतिष्ठत्॥ ईर्मान्तासः सिलिकमध्यमासः सग्ं शूरणासो दिव्यासो अत्याः। हग्ं सा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः॥ तव शरीरं पतयिष्ण्ववर्वन्तव चित्तं वात इव ध्रजीमान्। तव शृङ्गाणि विष्ठिता पुरुत्राऽरण्येषु जर्भुराणा चरन्ति॥ उप [३७] प्राऽगाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः। अजः पुरो नीयते नाभिरस्याऽनु पश्चात्कवयो यन्ति रेभाः॥ उप प्राऽगात्परमं यथ्सधस्थमर्वाग्ं अच्छा पितरं मातरं च। अद्यादे वाञ्जुष्टतमो हि गम्या अथाऽऽ शास्ते दाशुषे वार्याणि॥[३८]

*विपृक्तो दिवा वीर्यमुपैकान्न चत्वारिग्ंशच्च॥**4.6.7***॥

मा नो मित्रो वरुणो अर्यमाऽऽयुरिन्द्र ऋभुक्षा मरुतः परि ख्यन्न्। यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि॥ यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति। सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः॥ एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः। अभिप्रियं यत्पुरोडाशमर्वता त्वष्टे- [३९] देनग्ं सौश्रवसाय जिन्वति॥ यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति। अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः॥ होताऽध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शग्ग् स्ता सुविप्रः। तेन यज्ञेन स्वरं कृतेन स्विष्टेन वक्षणा आ पृणध्वम्॥ यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति। ये चाऽर्वते पचनग्ं सं भरन्त्युतो [४०] तेषामभिगूर्तिर्न इन्वतु॥ उप प्राऽगाथ्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः। अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम्॥ यद्वाजिनो दाम सं दानमर्वतो या शीर्षण्या रशना रज्जुरस्य। यद्वा घाऽस्य प्रभृतमास्ये तृणग्ं सर्वा ता ते अपि देवेष्वस्तु॥ यदश्वस्य क्रविषो [४१] मक्षिकाऽऽश यद्वा स्वरौ स्वधितौ रिप्तमस्ति। यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु॥ यदूवध्यमुदरस्याऽपवाति य आमस्य क्रविषो गन्धो अस्ति। सुकृता तच्छमितारः कृण्वन्तूत मेधग्ं शृतपाकं पचन्तु॥ यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्याऽवधावति। मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु॥[४२]

इदुतो क्रविषः श्रिषथ्सप्त च॥4.6.8॥

ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निर्हरेति। ये चाऽर्वतो माग्ं

सभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु॥ यन्नीक्षणं माग् स्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि। ऊष्मण्याऽपिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम्॥ निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः। यच्च पपौ यच्च घासि [४३] ञ्जघास सर्वा ता ते अपि देवेष्वस्तु॥ मा त्वाऽग्निर्ध्वनयिद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः। इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम्॥ यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै। सन्दानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति॥ यत्ते सादे महसा शूकृतस्य पार्ष्णिया वा कशया [४४] वा तुतोद। स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि॥ चतुस्त्रिग्ं शद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति। अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त॥ एकस्त्वष्टुरश्वस्या विशास्ता द्वा यन्तारा भवतस्तथर्तुः। या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ॥ मा त्वा तपत् [४५] प्रिय आत्माऽपियन्तं मा स्वधितिस्तनुव आ तिष्ठिपत्ते। मा ते गृध्नुरविशस्ताऽतिहाय च्छिद्रा गात्राण्यसिना मिथू कः॥ न वा उवेतन्म्रियसे न रिष्यसि देवाग्ं इदेषि पथिभिः सुगेभिः। हरी ते युञ्जा पृषती अभूतामुपाऽस्थाद्वाजी धुरि रासभस्य॥ सुगव्यं नो वाजी स्वश्वियं पुग्ं सः पुत्राग्ं उत विश्वापुषग्ं रयिम्। अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनताग्ं हविष्मान्॥[१]

*घासिंकशया तपद्रयिंनव च॥**4.6.9**॥*

*अश्मन् य इमोदेनमाशुः प्राचीं जीमूतस्य यदक्रन्दो मा नो मित्रो ये वाजिनं नव॥**9**॥*

अश्मन् मनोयुजं प्राचीमनु शर्म यच्छतु तेषामभिगूर्तिः षट्चत्वारिग्ंशत्॥४६॥

अश्मन् हविष्मान्॥

॥ हरिः ओम्॥

॥ श्री कृष्णार्पणमस्तु॥

॥ इति चतुर्थ काण्डे षष्ठः प्रश्नः॥